# Shri Surya Sahasranamavali 1 108 Names

# श्रीसूर्यसहस्रनामावली १

## Document Information

Text title : Shri Surya Sahasranamavali 1 1008 Names

File name : suuryasahasranAmAvalIBhaviShya.itx

Category : sahasranAmAvalI, navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : From stotra

Proofread by : PSA Easwaran

Description-comments : From bhaviShyapuraNa referenced in Gita press version. Shaktapramoda has variations. Se corresponding stotra.

Latest update : January 18, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 7, 2020

*sanskritdocuments.org*

# श्रीसूर्यसहस्रनामावली १

ध्यानम् -
ध्येयः सदा सवितृमण्डलमध्यवर्ती
    नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
    हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

ॐ विश्वविदे नमः । विश्वजिते । विश्वकर्त्रे । विश्वात्मने । विश्वतोमुखाय ।
विश्वेश्वराय । विश्वयोनये । नियतात्मने । जितेन्द्रियाय । कालाश्रयाय ।
कालकर्त्रे । कालघ्ने । कालनाशनाय । महायोगिने । महासिद्धये ।
महात्मने । सुमहाबलाय । प्रभवे । विभवे । भूतनाथाय नमः । २०

ॐ भूतात्मने नमः । भुवनेश्वराय । भूतभव्याय । भावितात्मने ।
भूतान्तःकरणाय । शिवाय । शरण्याय । कमलानन्दाय । नन्दनाय ।
नन्दवर्धनाय । वरेण्याय । वरदाय । योगिने । सुसंयुक्ताय ।
प्रकाशकाय । प्राप्तयानाय । परप्राणाय । पूतात्मने । प्रयताय ।
प्रियाय नमः । ४०

ॐ नयाय नमः । सहस्रपादे । साधवे । दिव्यकुण्डलमण्डिताय ।
अव्यङ्गधारिणे । धीरात्मने । सवित्रे । वायुवाहनाय । समाहितमतये ।
दात्रे । विधात्रे । कृतमङ्गलाय । कपर्दिने । कल्पपादे । रुद्राय ।
सुमनाय । धर्मवत्सलाय । समायुक्ताय । विमुक्तात्मने ।
कृतात्मने नमः । ६०

ॐ कृतिनां वराय नमः । अविचिन्त्यवपवे । श्रेष्ठाय । महायोगिने ।
महेश्वराय । कान्ताय । कामारये । आदित्याय । नियतात्मने । निराकुलाय ।
कामाय । कारुणिकाय । कर्त्रे । कमलाकरबोधनाय । सप्तसप्तये ।
अचिन्त्यात्मने । महाकारुणिकोत्तमाय । सञ्जीवनाय । जीवनाथाय ।
जयाय नमः । ८०

ॐ जीवाय नमः । जगत्पतये । अयुक्ताय । विश्वनिलयाय । संविभागिने ।
वृषध्वजाय । वृषाकपये । कल्पकर्त्रे । कल्पान्तकरणाय । रवये ।
एकचक्ररथाय । मौनिने । सुरथाय । रथिनां वराय । सक्रोधनाय ।
रश्मिमालिने । तेजोराशये । विभावसवे । दिव्यकृते । दिनकृते नमः । १००

ॐ देवाय नमः । देवदेवाय । दिवस्पतये । दीननाथाय । हराय ।
होत्रे । दिव्यबाहवे । दिवाकराय । यज्ञाय । यज्ञपतये । पूष्णे ।
स्वर्णरेतसे । परावराय । परापरज्ञाय । तरणये । अंशुमालिने ।
मनोहराय । प्राज्ञाय । प्राज्ञपतये । सूर्याय नमः । १२०

ॐ सवित्रे नमः । विष्णवे । अंशुमते । सदागतये । गन्धवहाय ।
विहिताय । विधये । आशुगाय । पतङ्गाय । पतगाय । स्थाणवे ।
विहङ्गाय । विहगाय । वराय । हर्यश्वाय । हरिताश्वाय । हरिदश्वाय ।
जगत्प्रियाय । त्र्यम्बकाय । सर्वदमनाय नमः । १४०

ॐ भावितात्मने नमः । भिषग्वराय । आलोककृते । लोकनाथाय ।
लोकालोकनमस्कृताय । कालाय । कल्पान्तकाय । वह्नये । तपनाय ।
संप्रतापनाय । विरोचनाय । विरूपाक्षाय । सहस्राक्षाय ।
पुरन्दराय । सहस्ररश्मये । मिहिराय । विविधाम्बरभूषणाय ।
खगाय । प्रतर्दनाय । धन्याय नमः । १६०

ॐ हयगाय नमः । वाग्विशारदाय । श्रीमते । अशिशिराय । वाग्मिने ।
श्रीपतये । श्रीनिकेतनाय । श्रीकण्ठाय । श्रीधराय । श्रीमते ।
श्रीनिवासाय । वसुप्रदाय । कामचारिणे । महामायाय । महोग्राय ।
अविदितामयाय । तीर्थक्रियावते । सुनयाय । विभक्ताय ।
भक्तवत्सलाय नमः । १८०

ॐ कीर्तये नमः । कीर्तिकराय । नित्याय । कुण्डलिने । कवचिने । रथिने ।
हिरण्यरेतसे । सप्ताश्वाय । प्रयतात्मने । परन्तपाय । बुद्धिमते ।
अमरश्रेष्ठाय । रोचिष्णवे । पाकशासनाय । समुद्राय । धनदाय ।
धात्रे । मान्धात्रे । कश्मलापहाय । तमोघ्नाय नमः । २००

ॐ ध्वान्तघ्ने नमः । वह्नये । होत्रे । अन्तःकरणाय । गुहाय । पशुमते ।
प्रयतानन्दाय । भूतेशाय । श्रीमतां वराय । नित्याय । अदिताय ।
नित्यरथाय । सुरेशाय । सुरपूजिताय । अजिताय । विजिताय । जेत्रे ।
जङ्गमस्थावरात्मकाय । जीवानन्दाय । नित्यगामिने नमः । २२०

ॐ विजेत्रे नमः । विजयप्रदाय । पर्जन्याय । अग्नये । स्थितये ।
स्थेयाय । स्थविराय । निरञ्जनाय । प्रद्योतनाय । रथारूढाय ।
सर्वलोकप्रकाशकाय । ध्रुवाय । मेषिने । महावीर्याय । हंसाय ।
संसारतारकाय । सृष्टिकर्त्रे । क्रियाहेतवे । मार्तण्डाय । मरुतां
पतये नमः । २४०

ॐ मरुत्वते नमः । दहनाय । त्वष्ट्रे । भगाय । भर्गाय । अर्यम्णे ।
कपये । वरुणेशाय । जगन्नाथाय । कृतकृत्याय । सुलोचनाय ।
विवस्वते । भानुमते । कार्याय । कारणाय । तेजसां निधये ।
असङ्गगामिने । तिग्मांशवे । धर्मांशवे । दीप्तदीधितये नमः । २६०

ॐ सहस्रदीधितये नमः । ब्रध्नाय । सहस्रांशवे । दिवाकराय ।
गभस्तिमते । दीधितिमते । स्रग्विणे । मणिकुलद्युतये । भास्कराय ।
सुरकार्यज्ञाय । सर्वज्ञाय । तीक्ष्णदीधितये । सुरज्येष्ठाय ।
सुरपतये । बहुज्ञाय । वचसां पतये । तेजोनिधये । बृहत्तेजसे ।
बृहत्कीर्तये । बृहस्पतये नमः । २८०

ॐ अहिमते नमः । ऊर्जिताय । धीमते । आमुक्ताय । कीर्तिवर्धनाय ।
महावैद्याय । गणपतये । धनेशाय । गणनायकाय । तीव्रप्रतापनाय ।
तापिने । तापनाय । विश्वतापनाय । कार्तस्वराय । हृषीकेशाय ।
पद्मानन्दाय । अतिनन्दिताय । पद्मनाभाय । अमृताहाराय ।
स्थितिमते नमः । ३००

ॐ केतुमते नमः । नभसे । अनाद्यन्ताय । अच्युताय । विश्वाय ।
विश्वामित्राय । घृणये । विराजे । आमुक्तकवचाय । वाग्मिने ।
कञ्चुकिने । विश्वभावनाय । अनिमित्तगतये । श्रेष्ठाय । शरण्याय ।
सर्वतोमुखाय । विगाहिने । वेणुरसहाय । समायुक्ताय ।
समाक्रतवे नमः । ३२०

ॐ धर्मकेतवे नमः । धर्मरतये । संहर्त्रे । संयमाय । यमाय ।
प्रणतार्तिहराय । वायवे । सिद्धकार्याय । जनेश्वराय । नभसे ।
विगाहनाय । सत्याय । सवित्रे । आत्मने । मनोहराय । हारिणे । हरये ।
हराय । वायवे । ऋतवे नमः । ३४०

ॐ कालानलद्युतये नमः । सुखसेव्याय । महातेजसे । जगतामेककारणाय ।
महेन्द्राय । विष्टुताय । स्तोत्राय । स्तुतिहेतवे । प्रभाकराय ।

सहस्रकराय । आयुष्मते । अरोषाय । सुखदाय । सुखिने । व्याधिघ्ने ।
सुखदाय । सौख्याय । कल्याणाय । कलतां वराय । आरोग्यकारणाय नमः ।
३६०

ॐ सिद्धये नमः । ऋद्धये । वृद्धये । बृहस्पतये । हिरण्यरेतसे ।
आरोग्याय । विदुषे । ब्रध्नाय । बुधाय । महते । प्राणवते ।
धृतिमते । घर्माय । घर्मकर्त्रे । रुचिप्रदाय । सर्वप्रियाय ।
सर्वसहाय । सर्वशत्रुविनाशनाय । प्रांशवे । विद्योतनाय नमः । ३८०

ॐ द्योताय नमः । सहस्रकिरणाय । कृतिने । केयूरिणे । भूषणोद्भासिने ।
भासिताय । भासनाय । अनलाय । शरण्यार्तिहराय । होत्रे । खद्योताय ।
खगसत्तमाय । सर्वद्योताय । भवद्योताय । सर्वद्युतिकराय ।
मताय । कल्याणाय । कल्याणकराय । कल्याय । कल्यकराय नमः । ४००

ॐ कवये नमः । कल्याणकृते । कल्यवपवे । सर्वकल्याणभाजनाय ।
शान्तिप्रियाय । प्रसन्नात्मने । प्रशान्ताय । प्रशमप्रियाय ।
उदारकर्मणे । सुनयाय । सुवर्चसे । वर्चसोज्ज्वलाय । वर्चस्विने ।
वर्चसामीशाय । त्रैलोक्येशाय । वशानुगाय । तेजस्विने । सुयशसे ।
वर्ष्मिणे । वर्णाध्यक्षाय नमः । ४२०

ॐ बलिप्रियाय नमः । यशस्विने । तेजोनिलयाय । तेजस्विने ।
प्रकृतिस्थिताय । आकाशगाय । शीघ्रगतये । आशुगाय । गतिमते ।
खगाय । गोपतये । ग्रहदेवेशाय । गोमते । एकाय । प्रभञ्जनाय ।
जनित्रे । प्रजनाय । जीवाय । दीपाय । सर्वप्रकाशकाय नमः । ४४०

ॐ सर्वसाक्षिने नमः । योगनित्याय । नभस्वते । असुरान्तकाय ।
रक्षोघ्नाय । विघ्नशमनाय । किरीटिने । सुमनःप्रियाय । मरीचिमालिने ।
सुमतये । कृताभिख्यविशेषकाय । शिष्टाचाराय । शुभाकाराय ।
स्वचाराचारतत्पराय । मन्दाराय । माठराय । वेणवे । क्षुधापाय ।
क्ष्मापतये । गुरवे नमः । ४६०

ॐ सुविशिष्टाय नमः । विशिष्टात्मने । विधेयाय । ज्ञानशोभनाय ।
महाश्वेताय । प्रियाय । ज्ञेयाय । सामगाय । मोक्षदायकाय ।
सर्ववेदप्रगीतात्मने । सर्ववेदलयाय । महते । वेदमूर्तये ।
चतुर्वेदाय । वेदभृते । वेदपारगाय । क्रियावते । असिताय । जिष्णवे ।
वरीयांशवे नमः । ४८०

ॐ वरप्रदाय नमः । व्रतचारिणे । व्रतधराय । लोकबन्धवे ।
अलङ्कृताय । अलङ्काराक्षराय । वेद्याय । विद्यावते । विदिताशयाय ।
आकाराय । भूषणाय । भूष्याय । भूष्णवे । भुवनपूजिताय ।
चक्रपाणये । ध्वजधराय । सुरेशाय । लोकवत्सलाय । वाग्मिपतये ।
महाबाहवे नमः । ५००

ॐ प्रकृतये नमः । विकृतये । गुणाय । अन्धकारापहाय । श्रेष्ठाय ।
युगावर्ताय । युगादिकृते । अप्रमेयाय । सदायोगिने । निरहङ्काराय ।
ईश्वराय । शुभप्रदाय । शुभाय । शास्त्रे । शुभकर्मणे ।
शुभप्रदाय । सत्यवते । श्रुतिमते । उच्चैर्नकाराय ।
वृद्धिदाय नमः । ५२०

ॐ अनलाय नमः । बलभृते । बलदाय । बन्धवे । मतिमते ।
बलिनां वराय । अनङ्गाय । नागराजेन्द्राय । पद्मयोनये । गणेश्वराय ।
संवत्सराय । ऋतवे । नेत्रे । कालचक्रप्रवर्तकाय । पद्मेक्षणाय ।
पद्मयोनये । प्रभावते । अमराय । प्रभवे । सुमूर्तये नमः । ५४०

ॐ सुमतये नमः । सोमाय । गोविन्दाय । जगदादिजाय । पीतवाससे ।
कृष्णवाससे । दिग्वाससे । इन्द्रियातिगाय । अतीन्द्रियाय । अनेकरूपाय ।
स्कन्दाय । परपुरञ्जयाय । शक्तिमते । जलधृगे । भास्वते ।
मोक्षहेतवे । अयोनिजाय । सर्वदर्शिने । जितादर्शाय ।
दुःस्वप्नाशुभनाशनाय नमः । ५६०

ॐ माङ्गल्यकर्त्रे नमः । तरणये । वेगवते । कश्मलापहाय ।
स्पष्टाक्षराय । महामन्त्राय । विशाखाय । यजनप्रियाय ।
विश्वकर्मणे । महाशक्तये । द्युतये । ईशाय । विहङ्गमाय ।
विचक्षणाय । दक्षाय । इन्द्राय । प्रत्यूषाय । प्रियदर्शनाय ।
अखिन्नाय । वेदनिलयाय नमः । ५८०

ॐ वेदविदे नमः । विदिताशयाय । प्रभाकराय । जितरिपवे । सुजनाय ।
अरुणसारथये । कुनाशिने । सुरताय । स्कन्दाय । महिताय । अभिमताय ।
गुरवे । ग्रहराजाय । ग्रहपतये । ग्रहनक्षत्रमण्डलाय । भास्कराय ।
सततानन्दाय । नन्दनाय । नरवाहनाय । मङ्गलाय नमः । ६००

ॐ मङ्गलवते नमः । माङ्गल्याय । मङ्गलावहाय ।
मङ्गल्यचारुचरिताय । शीर्णाय । सर्वव्रताय । व्रतिने । चतुर्मुखाय ।

पद्ममालिने । पूतात्मने । प्रणतार्तिघ्ने । अकिञ्चनाय । सतामीशाय ।
निर्गुणाय । गुणवते । शुचये । सम्पूर्णाय । पुण्डरीकाक्षाय । विधेयाय ।
योगतत्पराय नमः । ६२०

ॐ सहस्रांशवे नमः । क्रतुमतये । सर्वज्ञाय । सुमतये । सुवाचे ।
सुवाहनाय । माल्यदाम्ने । कृताहाराय । हरिप्रियाय । ब्रह्मणे ।
प्रचेतसे । प्रथिताय । प्रयतात्मने । स्थिरात्मकाय । शतविन्दवे ।
शतमुखाय । गरीयसे । अनलप्रभाय । धीराय । महत्तराय नमः । ६४०

ॐ विप्राय नमः । पुराणपुरुषोत्तमाय । विद्याराजाधिराजाय । विद्यावते ।
भूतिदाय । स्थिताय । अनिर्देश्यवपवे । श्रीमते । विपाप्मने ।
बहुमङ्गलाय । स्वःस्थिताय । सुरथाय । स्वर्णाय । मोक्षदाय ।
बलिकेतनाय । निर्द्वन्द्वाय । द्वन्द्वघ्ने । सर्गाय । सर्वगाय ।
संप्रकाशकाय नमः । ६६०

ॐ दयालवे नमः । सूक्ष्मधिये । क्षान्तये । क्षेमाक्षेमस्थितिप्रियाय ।
भूधराय । भूपतये । वक्त्रे । पवित्रात्मने । त्रिलोचनाय ।
महावराहाय । प्रियकृते । दात्रे । भोक्त्रे । अभयप्रदाय ।
चक्रवर्तिने । धृतिकराय । सम्पूर्णाय । महेश्वराय ।
चतुर्वेदधराय । अचिन्त्याय नमः । ६८०

ॐ विनिन्द्याय नमः । विविधाशनाय । विचित्ररथाय । एकाकिने ।
सप्तसप्तये । परात्पराय । सर्वोदधिस्थितिकराय । स्थितिस्थेयाय ।
स्थितिप्रियाय । निष्कलाय । पुष्कलाय । विभवे । वसुमते ।
वासवप्रियाय । पशुमते । वासवस्वामिने । वसुधाम्ने । वसुप्रदाय ।
बलवते । ज्ञानवते नमः । ७००

ॐ तत्त्वाय नमः । ओंङ्काराय । त्रिषु संस्थिताय । सङ्कल्पयोनये ।
दिनकृते । भगवते । कारणापहाय । नीलकण्ठाय । धनाध्यक्षाय ।
चतुर्वेदप्रियंवदाय । वषड्काराय । उद्गात्रे । होत्रे । स्वाहाकाराय ।
हुताहुतये । जनार्दनाय । जनानन्दाय । नराय । नारायणाय ।
अम्बुदाय नमः । ७२०

ॐ सन्देहनाशनाय नमः । वायवे । धन्विने । सुरनमस्कृताय ।
विग्रहिने । विमलाय । विन्दवे । विशोकाय । विमलद्युतये । द्युतिमते ।
द्योतनाय । विद्युते । विद्यावते । विदिताय । बलिने । घर्मदाय ।

हिमदाय । हासाय । कृष्णवर्त्मने । सुताजिताय नमः । ७४०

ॐ सावित्रीभाविताय नमः । राज्ञे । विश्वामित्राय । घृणये । विराजे ।
सप्तार्चिषे । सप्ततुरगाय । सप्तलोकनमस्कृताय । सम्पूर्णाय ।
जगन्नाथाय । सुमनसे । शोभनप्रियाय । सर्वात्मने । सर्वकृते ।
सृष्टये । सप्तिमते । सप्तमीप्रियाय । सुमेधसे । मेधिकाय ।
मेध्याय नमः । ७६०

ॐ मेधाविने नमः । मधुसूदनाय । अङ्गिरःपतये । कालज्ञाय ।
धूमकेतवे । सुकेतनाय । सुखिने । सुखप्रदाय । सौख्याय । कामिने
कान्तये । कान्तिप्रियाय । मुनये । सन्तापनाय । सन्तपनाय । आतपाय ।
तपसां पतये । उमापतये । सहस्रांशवे । प्रियकारिणे ।
प्रियङ्कराय नमः । ७८०

ॐ प्रीतये नमः । विमन्यवे । अम्भोत्थाय । खञ्जनाय । जगतां पतये ।
जगत्पित्रे । प्रीतमनसे । सर्वाय । खर्वाय । गुहाय । अचलाय ।
सर्वगाय । जगदानन्दाय । जगन्नेत्रे । सुरारिघ्ने । श्रेयसे ।
श्रेयस्कराय । ज्यायसे । महते । उत्तमाय नमः । ८००

ॐ उद्भवाय नमः । उत्तमाय । मेरुमेयाय । अथाय । धरणाय ।
धरणीधराय । धराध्यक्षाय । धर्मराजाय । धर्माधर्मप्रवर्तकाय ।
रथाध्यक्षाय । रथगतये । तरुणाय । तनिताय । अनलाय । उत्तराय ।
अनुत्तरस्तापिने । अवाक्पतये । अपां पतये । पुण्यसङ्कीर्तनाय ।
पुण्याय नमः । ८२०

ॐ हेतवे नमः । लोकत्रयाश्रयाय । स्वर्भानवे । विगतानन्दाय ।
विशिष्टोत्कृष्टकर्मकृते । व्याधिप्रणाशनाय । क्षेमाय । शूराय ।
सर्वजितां वराय । एकरथाय । रथाधीशाय । शनैश्चरस्य
पित्रे । वैवस्वतगुरवे । मृत्यवे । धर्मनित्याय । महाव्रताय ।
प्रलम्बहारसञ्चारिणे । प्रद्योताय । द्योतितानलाय ।
सन्तापहृते नमः । ८४०

ॐ परस्मै नमः । मन्त्राय । मन्त्रमूर्तये । महाबलाय । श्रेष्ठात्मने ।
सुप्रियाय । शम्भवे । मरुतामीश्वरेश्वराय । संसारगतिविच्छेत्त्रे ।
संसारार्णवतारकाय । सप्तजिह्वाय । सहस्रार्चिषे । रत्नगर्भाय ।
अपराजिताय । धर्मकेतवे । अमेयात्मने । धर्माधर्मवरप्रदाय ।

लोकसाक्षिणे । लोकगुरवे । लोकेशाय नमः । ८६०

ॐ चण्डवाहनाय नमः । धर्मयूपाय । यूपवृक्षाय । धनुष्पाणये ।
धनुर्धराय । पिनाकधृते । महोत्साहाय । महामायाय । महाशनाय ।
वीराय । शक्तिमतां श्रेष्ठाय । सर्वशस्त्रभृतां वराय ।
ज्ञानगम्याय । दुराराध्याय । लोहिताङ्गाय । विवर्धनाय । खगाय ।
अन्धाय । धर्मदाय । नित्याय नमः । ८८०

ॐ धर्मकृते नमः । चित्रविक्रमाय । भगवते । आत्मवते । मन्त्राय ।
त्र्यक्षराय । नीललोहिताय । एकाय । अनेकाय । त्रयिने । कालाय ।
सवित्रे । समितिञ्जयाय । शार्ङ्गधन्वने । अनलाय । भीमाय ।
सर्वप्रहरणायुधाय । सुकर्मणे । परमेष्ठिने । नाकपालिने नमः । ९००

ॐ दिविस्थिताय नमः । वदान्याय । वासुकये । वैद्याय । आत्रेयाय ।
पराक्रमाय । द्वापराय । परमोदाराय । परमाय । ब्रह्मचर्यवते ।
उदीच्यवेषाय । मुकुटिने । पद्महस्ताय । हिमांशुभृते । सिताय ।
प्रसन्नवदनाय । पद्मोदरनिभाननाय । सायं दिवा दिव्यवपुषे ।
अनिर्देश्याय । महालयाय नमः । ९२०

ॐ महारथाय नमः । महते । ईशाय । शेषाय । सत्त्वरजस्तमसे ।
धृतातपत्रप्रतिमाय । विमर्षिने । निर्णयाय । स्थिताय । अहिंसकाय ।
शुद्धमतये । अद्वितीयाय । विवर्धनाय । सर्वदाय । धनदाय ।
मोक्षाय । विहारिणे । बहुदायकाय । चारुरात्रिहराय । नाथाय नमः । ९४०

ॐ भगवते नमः । सर्वगाय । अव्ययाय । मनोहरवपवे । शुभ्राय ।
शोभनाय । सुप्रभावनाय । सुप्रभावाय । सुप्रतापाय । सुनेत्राय ।
दिग्विदिक्पतये । राज्ञीप्रियाय । शब्दकराय । ग्रहेशाय । तिमिरापहाय ।
सैंहिकेयरिपवे । देवाय । वरदाय । वरनायकाय । चतुर्भुजाय नमः । ९६०

ॐ महायोगिने नमः । योगीश्वरपतये । अनादिरूपाय ।
अदितिजाय । रत्नकान्तये । प्रभामयाय । जगत्प्रदीपाय ।
विस्तीर्णाय । महाविस्तीर्णमण्डलाय । एकचक्ररथाय ।
स्वर्णरथाय । स्वर्णशरीरधृषे । निरालम्बाय । गगनगाय ।
धर्मकर्मप्रभावकृते । धर्मात्मने । कर्मणां साक्षिणे । प्रत्यक्षाय ।
परमेश्वराय । मेरुसेविने नमः । ९८०

ॐ सुमेधाविने नमः । मेरुरक्षाकराय । महते । आधारभूताय ।

रतिमते । धनधान्यकृते । पापसन्तापहर्त्रे । मनोवाञ्छितदायकाय ।
रोगहर्त्रे । राज्यदायिने । रमणीयगुणाय । अनृणिने ।
कालत्रयानन्तरूपाय । मुनिवृन्दनमस्कृताय । सन्ध्यारागकराय ।
सिद्धाय । सन्ध्यावन्दनवन्दिताय । साम्राज्यदाननिरताय ।
समाराधनतोषवते । भक्तदुःखक्षयकराय नमः । १०००

ॐ भवसागरतारकाय नमः । भयापहर्त्रे । भगवते ।
अप्रमेयपराक्रमाय । मनुस्वामिने । मनुपतये । मान्याय ।
मन्वन्तराधिपाय । १००८

फलश्रुतिः
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्चसि ।
नाम्नां सहस्रं सवितुः पाराशर्यो यदाह मे ॥ १॥

धन्यं यशस्यमायुष्यं दुःखदुःस्वप्ननाशनम् ।
बन्धमोक्षकरं चैव भानोर्नामानुकीर्तनात् ॥ २॥

यस्त्विदं शृणुयान्नित्यं पठेद्वा प्रयतो नरः ।
अक्षयं सुखमन्नाद्यं भवेत्तस्योपसाधितम् ॥ ३॥

नृपाग्नितस्करभयं व्याधितो न भयं भवेत् ।
विजयी च भवेन्नित्यमाश्रयं परमाप्नुयात् ॥ ४॥

कीर्तिमान् सुभगो विद्वान् स सुखी प्रियदर्शनः ।
जीवेद्वर्षशतायुश्च सर्वव्याधिविवर्जितः ॥ ५॥

नाम्नां सहस्रमिदमंशुमतः पठेद्यः
प्रातः शुचिर्नियमवान् सुसमृद्धियुक्तः ।
दूरेण तं परिहरन्ति सदैव रोगाः
भूताः सुपर्णमिव सर्वमहोरगेन्द्राः ॥ ६॥

इति श्रीभविष्यपुराणे सप्तमकल्पे ।
श्रीभगवत्सूर्यस्य सहस्रनामावलिः समाप्ता ।
श्रीसूर्यसहस्रनामावली ।

Proofread by PSA Easwaran

*Shri Surya Sahasranamavali 1 108 Names*

pdf was typeset on June 7, 2020

Please send corrections to *sanskrit@cheerful.com*